कालार्थोक्त प्रधानता। फलक्रतुप्रयुक्तत्वविवेकाय विचारि-

॥तंत्ररत्ने चतुर्थोध्यायः॥
पत्रे १०४ समग्र

श्रीगणेशाय नमः॥ श्रीदेवमहाराजमुकुन्ददेवभट

॥तंत्ररत्ने [redacted]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तंत्ररत्न ॥ ॥श्रीगणेशाय नमः॥ ॥ॐ नमः श्रीनृसिंहाय॥ ॥अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा॥ पूर्वाध्याये विषययोर्यैवमेदमर्थोस्म
विति नमिहापि क्रतुपुरुषैदमर्थमेव विज्ञातइति न लक्षणभेदः स्यादत आह। जीयेनाध्यायेनावच्छेदोषत्वेक क्रत्वर्थस्य
१ पुरुषार्थस्यतिर्विंतनाइति सम्बंधः। एतदेव विवृणोति विशेषश्चिन्ताइति पूर्वमवच्छेदसामान्येयथासमभेसामान्यानि देश न३
सिद्धैरमन विशेषातिदेश श्चिन्ताएवमिहापि सामान्यविशेषविषयत्वेन लक्षणभेदः। तदिदमेकदेशिमतं निराकरोति अ
हवेति पूर्वपक्षमाहत्ताव स्थवाशाहः। नहि सामान्यविशेषभेदेन लक्षणभेदः संभवति। पूर्वं नापि विशेषविचारात्। कर्मोप
पिजेमिनिः फलार्थत्वादित्पुरुषार्थत्वमुक्तं असंयुक्तप्रकरणादित्यादिनाच क्रत्वर्थत्वं। नहि लिंगप्रकरणक्रमसमा
ख्यानैः पुरुषार्थत्वमविशेषितं वेदमर्थो गम्यते किंतु क्रत्वर्थत्वमेव। तस्मान्नैवं लक्षणभेदः। कथं तर्हीत्याह अर्थैसमवेष राम
... लक्षणं साधारणं लक्षणान्तरा विषयभूतं विभ्नतो क्रत्वर्थपुरुषा १
... फल द्विमार्थवादादि विचारापेयथोक्तं फल विधर्थवादन

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कालार्थोऽङ्गप्रधानता। फलक्रतुप्रयुक्तत्वविवेकाय विचारितेति। सा च कारस्थेदमेव प्रयोजकाप्रयोजकत्वलक्षणार्थमस
मिश्रेत्याह अतिक्रान्तस्तृतीयविषय इति। यदि हि क्रत्वर्थपुरुषार्थविचारं गोदोहनादौ कृतं मा च कारो लक्षणार्थमसंस्त
ततो नैव तृतीयविषये इत्यवक्ष्यत्। तथा पंचमे चासाधारण्ये नैवेति। यस्मात्प्रयोजकाप्रयोजकत्वमसाधारणं तस्मादेवं चपदे
क्षते प्रयोजकाप्रयोजकलक्षणं कृतमिति। इतरथा हि क्रत्वर्थपुरुषार्थलक्षणं कृतमिति व्यपदेक्ष्यत। तस्मादेदमर्थलक्ष
णं पूर्वमिदं तु प्रयोजकाप्रयोजकलक्षणमिति लक्षणभेदः। शेषशेषित्वाधीनत्वाच्च प्रयुक्तेस्तदनन्तरमारम्भः। यद्यपि न सर्वे शे
षिणः शेषाणां प्रयोजकाः स्रुवोपवापवत्कपालस्यानैयोपि शेषिणः एवं तावच्छेषाणामेव प्रयोजका नान्य इति भवति शेष
लक्षणस्य प्रसक्तिलक्षणं प्रति हेतुता। ननु विधिरेव सर्वेषां प्रयोजकः किमत्र चिन्त्यते। सत्यं स[illegible]तु किमर्थं प्रयोजयति। किं
वा तु सोमस्य विधिरभिलाषार्थमेव दध्यानयनं प्रयुंक्ते किं वा वाजिनार्थमपि यदर्थं च यद्ग्रुह्यापतेतत्तस्य प्रयोजकमिति यावत्क्रिय
ते अतोऽभिलाषप्रयोजिका न वाजिनमिति तस्या न प्रयुक्ता चिन्ता। कः पुनः सूत्रार्थः उच्यते। प्रयुक्तिचिन्ता हि प्रकारभेदेन कथयति

स१

विधिःप्रयोजकः २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विक्रत्वर्थपुरुषार्थविचारद्वारेणक्रविसाद्वाक्रविफलविध्यर्थवादविचारेणतदनेनविशेषप्रतिज्ञाद्वारेणसामान्यप्रतिज्ञा
तंत्ररत्न॰ नमेवक्रियते।यथाबाधमुत्वयंचिंतयिष्यामइ नीयत्राचिंत्राप्रतिज्ञेति।ननुनात्रेदंविशेषप्रतिज्ञाद्वारेणसामान्यप्रतिज्ञा
नमेवक्रियते।येननविशेषाःसर्वेप्रतिज्ञायंते।क्रत्वर्थपुरुषार्थमात्रप्रतिज्ञानात्।परिहारमेतत्भाष्यकारेणोवाङ्कं।क्रत्वर्थं
२ :प्रधानंपुरुषार्थस्तेनाङ्गप्रधानजिज्ञासातावद्विदेवनादिविषयाक्रत्वर्थपुरुषार्थजिज्ञासैवातथाग्निविद्यासौत्रामणपायजे
१ नेत्यादेरङ्गप्रधानविचारार्थत्वेसौत्रामणपादानोक्रत्वर्थता।कालार्थंतुसंयोगेपु रुषार्थता।नयानसपापश्लोकंशृणोतीत्य
क्रत्वर्थे४ वमादेरर्थवादत्वेपर्णमयीत्यादिस्तुतिद्वारेणक्रत्वर्थताफलविधित्वेतुफलस्यपुरुषार्थतेतितस्यापिक्रत्वर्थपुरुषार्थजि
ज्ञासायामन्तर्भावः।प्रयोजकःकश्चित्पुरुषार्थोयथादर्शपूर्णमासादिस्तोगानांकश्चित्ग्रहणमपुरुषार्थेमपिप्रयोजकमस्तीति।
यथामिन्हा।अप्रयोजकःक्रत्वर्थोयथावाजिनं।अत्रापिकश्चिद्ग्रहणमनुवर्त्तते।विद्यतेह्यप्रयोजकोपिपुरुषार्थोयथागोदोहराम
हनादिप्रणयनादे।तदेवमनयत्रोभयसंभवेपिप्रायेणपुरुषार्थःप्रयोजकाइतिपुरुषार्थेत्वाद्धेनप्रयोजकोलक्ष्यते।क्रत्वर्थेमहे २

योजनसंबंधपर२५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्तु तत्प्रतियोगि वा विनार्थप्रयोजको लक्ष्यते । तेन वक्ष्यमाणां सुखग्रहणार्थं श्रोतृबुद्धिसमाधानार्थं च सूत्रेणानेन कथ्यते । नात्र संश
य पूर्वपक्षोत्तरपक्षैः प्रयोजनं । अर्थवादो नाम विधेः प्रयोजकत्वेनाक्षिप्तः हि न तावद्धि यागादिकं पुरुषं प्रवर्तयेत् प्रमाणत्वा
दतः पारिशेष्यात् समीहितसाधनत्वप्रतिपादकत्वेन सप्रवर्तकत्वमिति वक्तव्यं । न च तावता विग्रहवत्तिः सिध्यति स्वपमन
3 नुष्ठितस्य पिमेघच्छायादेरिव समीहितसाधनत्वसंभवात् । तस्माद्विधेः प्रयोजकत्वाभावात्प्रयुक्तिं विचारेण कर्तव्यइ निमित्त विग्रह
तेन तत्प्रतिबोधनायेदं सूत्रं । अस्ति प्रयोजकत्वं विधेः तथा च लोके दर्शनात्कर्तृसमीहितसाधनत्वे विषयस्य विधिरवगम
यति न समीहितसाधनत्वमात्रं । ततः प्रवर्तकत्वाद्विधेः प्रयुक्तिलक्षणमारभ्यणीयमिति । युक्तिश्च प्रीतिः पुरुषस्य । वक्ष्य
माणयोः कृत्वर्थपुरुषार्थयोः लक्षणमुच्यते । तत्र साधं यस्मिन् पदार्थे कृते इत्यादिना न्यायेनोक्तं । तदर्थेतोनुमाष्याद्विप
ति । यस्मिन् कृते पदार्थे पुरुषस्य प्रीतिरुपजायते स्वर्गादिलक्षणा स पुरुषार्थः पदार्थो दर्शपूर्णमासादिः कृतस्तस्य लिप्सा
र्थलक्षणेति । किमुक्तं भवति यदिलावल्लिप्साशब्देनानुष्ठानमुच्यते तद्धि पुरुषार्थे भुफलेच्छा निबंधनत्वादर्थलक्षणं कृत्वर्थे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तंत्ररत्न प्युत् शास्त्रायत्तमनुष्ठानमितिमतं तदयुक्तं। न हि क्रत्वर्थेष्वपि विधिना बलात्पुरुषः प्रवर्त्त्यते किं तु समीहितसाधनत्वाव
गमेनैव तेनोभयत्रापि समीहितसाधनत्वावगमे सति इच्छानिबंधनैव प्रवृत्तिः। अथ साधनतैव पुरुषार्थेष्ठलक्षणा। क्रत्वर्थेषु
३ शास्त्रायत्तेत्युच्यते तदपि न युक्तं। उभयत्रापि साधनत्वस्य शास्त्रापन्नत्वात्। न हि दर्शपूर्णमासादेः शास्त्रमन्तरेण फल
साधनत्वं गम्यते स्यान्मतं। लिप्साशब्देनेच्छोपायत्वमुच्यतेऽर्थेच्छायैन चोपादानं पर्यायो विधाक्षेपः शास्त्रशब्दे नापि विनियो
ग। तदनेनेष्टत्वं लक्षणमुक्तं भवति। यस्योपादानिकमेव शेषत्वं स पुरुषार्थः। यथा दर्शपूर्णमासादिर्यथा स्वर्गादिः।
६ उभयोरपि यथाक्रमं फलशेषत्वं पुरुषशेषत्वं चोपादानिकं सति विनियोग क्रत्वर्थत्वमिति। तदयुक्तं। तथा हि। अवा
प्तिलक्षणमपि न पुरुषार्थस्य लक्षणं। क्रत्वर्थलक्षणं यत्तु तदतिव्यापकं मतं। अध्ययनस्य पुरुषार्थत्वमिष्टं न चास्योपादा
निकमर्थज्ञानशेषत्वं प्रमाणान्तराधीनत्वात्। विधिनावगतसानाक्षेपात्। न हि विधिरर्थज्ञानार्थतामन्तरेण न घटते यत्तदाक्षेपात्। र
तस्मादव्यापकं लक्षणमिति। अपि च न चेष्टशः पदार्थः समस्ति यस्योपादानिकमेव शेषत्वं दर्शपूर्णमासादेर्हि यद्यपि फ २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

4

लशेषत्वमौपादानिकमवतस्थापि नियोगशेषत्वं वैनियोगिकं श्रुतिगम्यत्वात्॥ यद्युच्येत नियोगविषयतया यागस्वरूपं प्रतीय
ते न कस्यचिदुपसाध्यत्वमिति तद्युक्तं। उपसाध्यत्वेन हि नियोगः प्रमीयते नोपेतकर्तव्यतापदार्थता यागस्य नावगम्यते प्र
कृतिप्रत्ययाभ्यां स्वार्थौ मिथोन्विताव भिधीयेते न चान्वययोर्गुणप्रधानभावमन्तरेण संभवति। यत्नं च प्रत्ययार्थस्य नियोगस्य प्राधा
न्यं। न त्विन्नुपसज्जनीभूतप्रकृत्यर्थो विशिष्ट विधीयमानं श्रौतमेव यागस्य शेषत्वं। तद्यथा द्वितीयया प्राधान्यं वा विज्ञाप्यते क्रि
यायाः शेषत्वं बोध्यमानं श्रौतमेवं प्रत्ययेनापि प्रधानस्य कार्याभिधायिना प्रकृत्यर्थस्य शेषत्वं बोध्यमानं श्रौतमेव भवति। फ
लशेषत्वमपि च यागस्यौपादानिकं। श्रुत्याद्यगम्यत्वादिति न्यायरत्नमालायां दर्शितं तस्मान्न तावद्यागस्यौपादानिक
मेक मेव शेषत्वं। फलस्य तु पुरुषशेषत्वं लौकिकमेव न तु औपादानिकं अपि तु स्वार्थमेव हि फलं काम्यमानं कामि
नं नियोजं स्वीकुर्वाणो विधिः काम्यं प्रतियागस्य केवलं शेषत्वमाह। प्रति न तु फलस्य पुरुषशेषत्वं तस्य पुरुषेणास्वयमेवा
वगतत्वादनवगतस्यैवानियोगेनाप्याप्यत्वोपपत्तेः। न हि पुत्रार्थं ब्रह्मवर्चसादि प्रार्थ्यमानं पितरं नियुंजानो विजानते। इति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तंत्ररत्न योगः पित्रर्थतां ब्रह्मवर्चसादेरापादयति न ह्यसौ पुरुषार्थलक्षणेन तावदयुक्तं । यदपि सति विनियोगे क्रत्वर्थ इति तदप्युक्तिव्याप
कमक्रत्वर्थे प्राधान्ये सद्भावात् । तस्याश्रमीनिति द्वितीयाश्रुतिगम्यमग्निहोत्रफलं तस्मान्न विद्मः कोऽस्य साध्यसाध्यर्थ इति । स
४ माधत्ते । यत्संक्रत्वर्थपुरुषार्थयोर्द्वयोरपि साध्यसाधनसंबंधो वैदिको न प्रमाणान्तरगम्यस्तथापि वैदिको वै नियोगिको
नत्वेवं हि न्यतोपादानपरिभाष प्रमाणगम्य इति न लिङ्गाद्याख्येन साधनमुत्पन्नत्वे यस्यैकदेशिनिमित्तमर्थः किं तु पुरुष
र्थे पदार्थे करणमिच्छात एव न नियोगतो निविधिनः क्रत्वर्थत्वनिश्चातं इच्छातो न । कुतस्तर्हि नियोगतः तत्र तेन तत्करणमनुष्ठान
मभिप्रेतोक्तं । तस्यापि स्यार्थलक्षणेनेति । इच्छाधीनेत्यर्थः । नेनेच्छाधीनानुष्ठानः पुरुषार्थः शास्त्राधीनानुष्ठानः क्रत्वर्थ इति । न
नृभ्ययत्राप्यनुष्ठानमिष्टात एवं सत्यमेनावांस्तु विशेषः फले हि पुरुषस्य शास्त्रनिरपेक्षस्य रागतः प्रवृत्तिः साध्यप्रसूतत्वाच्च
साधनानुष्ठानस्यार्थलक्षणत्वमुच्यते । क्रत्वर्थस्य तु शास्त्रीयत्वे कृतप्रकाराय तन्मनुष्ठानं शास्त्रलक्षणमिति । एतदुक्तं भवति राम
स्वयंप्रार्थितसाध्याधीनानुष्ठानः पुरुषार्थस्तदुपकारार्थः क्रत्वर्थ इति यत्तु विधाद्यपरहितं यथाधानं यथाध्याधेनं तत्क्रत्वर्थं ४

य॰ त॰ १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विरोष ना । पि पुरुषार्थे केवलान्नि विद्यार्थत्वादिति ॥ एवं व्याख्याते फले तावत्स्वयमेव प्रवृत्तिस्तत्साधनेपि सामान्यतस्तत एवाख्या
तस्तु विशेषमात्रे तदङ्गेषु तु शास्त्राय नसाधनं परिज्ञानोत्तरकालं भवती प्रवृत्तिः शास्त्रलक्षणेति । भाष्यवार्त्तिकयोरपीयमे
व व्याख्यायत्र सामान्यतः प्रवृत्तिरर्थलक्षणा सपुरुषार्थस्तद्विपरीतः क्रत्वर्थः स्तदुपकारार्थः क्रत्वर्थः । इतरथा प्राधान्यस्य
6 क्रत्वर्थत्वापत्तेः । तस्मात्स्वयंप्राप्तार्थितफलनिमित्तानुष्ठानः पुरुषार्थस्तदुपकारार्थः क्रत्वर्थः । तदनेनैव लक्षणेनार्थ
फलस्याविधेयत्वं सूचितमित्यभिप्रायेणोक्तं । फलांशे भावनायाः प्रत्ययेन विधायकः । वक्ष्यतेडेमितिश्चात्रास
लिप्सार्थलक्षणेति यदुक्तं तदेवानेन सूत्रेण प्रतिपाद्यते । नहि न्याय शास्त्रेतत्प्रतिपादने संभवति लक्षणपरत्वमुक्तं ।
तेनैव व्याख्यातव्यं । ननु प्रयोजकाप्रयोजकलक्षणं वक्तव्यमिति लिङ्गनिर्धीयते किं फलांशे विधिः प्रयोजकोनेति । त
त्र करणांतिकर्त्तव्यतांशवत्फलांशस्यापि विधेयभावनाविशेषणत्वेन विधेयत्वे योमन्यते तं प्रत्युच्यते । यस्मिन् स्वर्ग
पश्वादावनुभूयमाने पुरुषस्य प्रीतिस्तुष्टिर्भवति तस्य लिप्सार्थलक्षणा । स्वारसिकीत्यर्थः । अविभक्तत्वात् । सर्वे हि फ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कमि ७

तं०५० लं प्रीत्याऽविभक्तं भवति । यत्तु भावना विशेषणत्वात्फलविधानमिति । सर्वं विशिष्टविधिर्विशेषणगोचरयति यद्यन्य
तो न लभ्यते । विशिष्टभावना विध्युत्तरकालमर्थान्तरविशेषणे विधिः कल्प्यमानो यत्र विधिमन्तरेण प्रवृत्तिर्नल
५ भ्यते तत्रैव कल्प्यते नान्यत्रा ऽनुपपत्त्यभावात् फले च रागत एव तिसर्वे सुंदरे पुरुषः प्रवर्त्तत इति किं विधिना तत्
स्मान्न विधेयं फलं । किं भवति प्रयोजनं । इपत विधिना भिचारस्य विधानात् प्रतिषेधाप्रवृत्तेरनर्थत्वं स्यानेतरयथा पूर्वः
पक्षः । सिद्धांते त्वविधानात्प्रतिषेधविषयत्वेनानर्थत्वमिति । प्रकृतमनुसरामः । अत्र चोदयति दुःखाकरत्वात्कष्टो
यागः पुरुषार्थः । यद्धि पुरुषस्यानुकूलवेदनीयं तत्पुरुषार्थं न दुःखाकरस्य यागस्यानुकूलवेदनीयतास्तीति । उ
त्तरत्वेना विभक्तत्वादिति स्वर्गावयवयोजयति साध्येना विनाभावात्साधनस्य पुरुषार्थतोक्ता । साध्यं प्रार्थ्यमान
स्य साधनमन्तरेण तदलाभात्साधनमप्यनुकूलवेदनीयं भवत्येवेति ॥ ॥ एवं वाप्यन निदृष्टसंस्कारणानीति फला राम
त्या०६ र्थवादेनुदाहरणमिति । अनति इत्यपमित्या द्विगतार्थो । गोदोहनादीनि वाक्यात्पुरुषार्थानि प्रकरणेनैकरूपका ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रकारिहरूपेते॥ तस्मात्समुच्चयेन पूर्वः पक्षः। असार्थः। यद्यपि पशुकामपदसमभिव्याहारात्पुरुषार्थत्वमेषां तथापि
क्रत्वर्थेऽप्रणयनाश्रयणान्न मुखेन क्रतूपकारकत्वं तावदत्वरूपांगीकर्त्तव्यं। तत्र यद्यनंगमेवेदं क्रतोः स्यात्तदा तत्त
स्यांगस्य हानौ वैगुण्यं स्यात्। वैगुण्याक्रत्वाश्रयणाच्च गुणादपि न फलं सिद्ध्येत्। तस्मादुभयानुग्रहार्थं क्रत्वर्थत्वम
प्येषामस्त्विति। सिद्धांतस्त्ववधारणया। कथमवधारणा। पुरुषार्थो नमो वेति। कुतः। तादर्थ्यलक्षणेन शेषत्वेन। ताद
र्थ्यलक्षणा चात्र शेषत्वस्य समर्थः। न ह्युपकारलक्षणं शेषत्वं येन क्रतूपकारकत्वात्तच्छेषत्वं स्यात्। किंतु तादर्थ्यल
क्षणं न चैषां क्रत्वर्थत्वे प्रमाणमस्ति। वाक्यस्य पुरुषार्थत्वमात्रे पर्यवसानात्। प्रकरणस्य च संयुक्तेऽप्युपहते।
अनंगस्यापि चोपकारकत्वाविरोधात्। यत्तूक्तं वैगुण्यं स्यादिति। तद्यदि चमसलोपाभिप्रायेणोक्तं तत्र सत्यपि स
मानं। यद्यपि गोदोहनं क्रतोरंगं स्यात्तथापि तद्गतिप्रयोगे चमसो न प्रवर्त्तत एव। अथांगत्वे सति तत एव क्रतूपका
रसंपत्तेरंगमपि चमसो नाद्रियते। उपकारायद्यंगानपेक्षमाणेन स्वनिष्ठानी ति तथा सति पुरुषार्थेनापि तत्संपत्तेर्वि

6

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं. व. ऽर्षदिंगलोपो न दोषः। अतश्च यथैवैनेमि त्रिकेन साम्प्रदस्या द्विनांगेनोवरुद्धे प्रयोगे नित्यस्य पांचदश्यादेरनंगत्वेन
श्यानुरूपार्थेनानंगेनाप्यवरुद्धे प्रयोगे लड्वा यादेवर्वमसादेरनंगत्वाल्लोपो न दोषः। तेन पञ्चकामप्रयोगे प्राप्यितम
६ त्रमंग मन्यनतुल्वमसमासवत्वं प्रणयनमित्ति पुरुषार्थान्येयगोदोहनादीनि॥ अत्र माध्यकारेण पूर्वपक्षावस्थायांगत्व
क्षत्वप्रकारस्तम्भो ह रपतडसुत्वाडव्यगुणसंस्कारेषु वादरिरित्युक्तो। सिद्धांतितु नयत्र प्रकरोति स शेषः। यस्तु यदर्थः
श्रूयते स तस्य शेष इत्युक्तो शेषः परार्थत्वादित्युक्तो। अत्र स्माष्यमाध्यग्रंथाद्नुमीयते बादरिमतं पूर्वपक्षस्तत्र बाद
र्यधिकरणइति। वादर्यधिकरणं हि द्रव्यगुणसंस्कारानामुपकारलक्षणाशेषत्वाभिप्रायेणाद्रव्यादिष्वेव शेषत्वमिति
षत्वावधारणपर वादरिमतं पूर्वपक्षं कृत्वा कर्मादिष्वपि शेषत्वमस्ति परार्थत्वलक्षणत्वादिति जैमिनिमतं सिद्धांति
तं प्रथमे व्याख्याने। द्वितीये तु वादरिमतमपि सिद्धांतमंगीकृत्य द्रव्यादिषु शेषत्वमेवेति द्रव्यादीनि शेषत्वेन नियम्य राम
कर्मादिषु शेषत्वं शेषित्वं चेत्युक्तं। तत्र प्रथममेव व्याख्यानमभिमतमिति ज्ञातो ग्रंथाद्नुमीयते॥ ॥एवं वा॥ इष्या ६

इति १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जेननियमं क्रत्वर्थः। इष्ट्वार्जनं च तन्नियमस्य इष्ट्वार्जननियमः। यदिदं प्रतिग्रहाद्युपायेन नियतं इष्ट्वार्जनं तत् क्रत्वर्थमिति
र्थः। कुतस्तेन क्रतुना हि द्रव्यमाकांक्षितं तेन क्रतुनैवार्थो हि धीयमानत्वात् इष्ट्वार्जनं क्रत्वर्थं। युक्तं चैतत् स्वाहा न दिस्समुपा
देयं। यद्देव क्रत्वर्थं इष्ट्वार्जनं तद्देवेत्थं प्रतिग्रहाद्युपायनियमेनोपादेयं भवति। यथावघातादयः क्रत्वर्थाः एवमयमपि नि
यमः। तस्मात् क्रतुविधिनैव सहास्य नियमविधेरेकवाक्यताऽपेक्षिता द्वारा। क्रत्वपूर्वेऽस्य दृष्टद्वारात् नियमापेक्षते। प्रति
ग्रहाद्युपायनियमस्तावदिष्ट्वार्जनोद्देशेन विधीयमानस्तदंगभूतं न स्वरूपे कार्ये वोपयोगि भवति। न चायं नियमा
दिष्ट्वार्जनेन स्वरूपेणोपयुज्यते विनापि तेन तत्सिद्धेः। कार्यमपि यदि क्रत्वपूर्वे स्यात् तस्यादृष्टद्वारात्तदुपयोगित्वं नियमस्य
युक्तं भवति। तस्मान्नियमबलादेवेष्ट्वार्जनं क्रत्वर्थमिति कल्प्यते। इतरत्र पुरुषार्थत्वपक्षे तु तदुपतिपद्यतार्थेष्ट्वार्जनमिति
यमेनाद्युपात्तं द्रव्यं धर्मव्याहंतस्येवतस्यान्तरान्नियमस्य फलमस्ति। इष्ट्वार्जनस्वरूपे तत्कार्ये वानुपयोगात्। तन्नार्जितं गवेष
णीयमानमुपस्थानाच्छ्रुतं फलमध्याहर्तव्यं तेन तस्य सहैकवाक्यता नियमस्य कल्पयितव्येति। ये तु न क्रत्वपद्यन्ते तेषामेकं रथ्यते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं॰ व॰ वात्तस्मान्न नियमस्य फलमश्रुतमप्याहत्य तेन सहैकवाक्यता कल्पयितव्येति। ननु क्रत्वर्थत्वेपि तदेकवाक्यताक
ल्पयितव्यैव। तत आह। अरत्र क्रत्वर्थत्वपक्षे श्रुतेन क्रतुविधिनैकवाक्यता तदन्यथा श्रुतेनेति विशेषः। तस्मात्सर्वम
७ वद्यं क्रत्वर्थं तन्मात्रोद्देशेन नियमविधानात्। स्वर्गादिनियमो हि प्रकरणस्थवाक्यक्रत्वर्थद्रव्योद्देशेन विधीयमानो
न द्रव्यं हि मानसं क्रत्वर्थतामापादयति। प्रतिग्रहादि पापनियमस्तु द्रव्यार्जनमात्रोद्देशेन विधीयमानस्तन्मात्रमेव क्र
त्वर्थतां सूचयति। तस्मात्सर्वं द्रव्यं क्रत्वर्थं। क्रत्वर्थे द्रव्यार्जने सति हिरण्यादिनाशे क्रत्वर्थद्रव्यनाशात् क्रतुवैगु च
ण्ये तामवसादिनां क्रतुप्रतिसमाधानार्थमुपदेशो युक्तो भवति। तदाह्य व्यतिरिक्तक्रतुसंबंधद्रव्यमुखेन क्रतूप
पत्तिश्चेतो [illegible] तत्र च पुरुषार्थपक्षे क्रतुवैगुण्याभावात् क्रतोश्चानुपस्थानान्न समाधानापेक्षा नास्तीति फलकल्पनैव
प्राप्नोति। तस्मात् क्रत्वर्थं द्रव्यार्जनस्य सर्वधर्मेभ्यः। श्रुत्यादिप्रमाणादनंतं क्रतोः पुरुषस्य तुष्टिमुत्पादयन्नर्जिता राम
र्थाः कामश्रुतिनिरपेक्षाः। ज्योतिष्टोमेनेत्यादिनिरपेक्षाः। तस्मात्पुरुषार्थमर्जनं। यत्तु क्रत्वविधिविहितत्वात्क्रत्व ७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्थेतेति तत्राह। शरीरधारणार्थमेवासौ पुरुषोऽभ्युपादत्ते। ननु किमित्यत आह। अ नयत्यनुपपन्ना हि कामश्रुतिर्निराद्रिये
त। न च पुरुषार्थेनोपार्जितमस्तीति नैव क्रतोरपि सिद्धेरन्यथानुपपत्तिः। स्वीपत्ते। यथाधाने वसंतादिविधिप्रयुक्ते तु द्रव्ये न का
मश्रुतिनिरस्तदा हि प्यते न चैतदपि। अपि च क्रत्वर्थद्रव्यार्जनेन क्रतुविघातः स्यात्। कुत इत्याह। द्रव्यतो हि शेनवद्द्रव्यः परिमा
गे क्रियमाणेऽयागो भवति। यत्र द्रव्ये हि शब्दसार्थं भिन्नक्रमश्च्युता द्रव्यभागे हि क्रियमाणे यागो भवतीति। ननु किमिमा
ह क्रतु प्रयुक्ते तु द्रव्याभावात् स्वीयद्रव्याभावात् परित्यागो नास्तीति क्रतुविघातः स्यात्। यथेष्टविनियोगो वै हि स्वत्वे केव
लक्रत्वर्थेनोपन्यस्ता। विनियोगाद्यथेष्ट विनियोगस्य चाभावात् स्वत्वाभाव इति। एतच्च अपाये एवंभूतस्य स्वत्वमुपलब्धमिति
मत्वोक्तं। न त्वेतदेवतं त्रं। क्रत्वर्थतयैव क्रयेणोपात्तस्य सोमस्य स्वत्वानपायादिति। एवं च नियमस्यार्जनांगत्वान्नदिति
क्रमे पुरुषस्योपायान्तरेणार्जने प्रसंगाभावः कल्प्यते न तु क्रत्वर्थत्वं प्रमाणवदिति। अन्नानंतरमपि वसादिभाष्यं तदेवं स
निप्रयोगकालान्तर्वहि रित्यनेन संगतार्थं वा तत्रैवोक्तं। द्रव्यमित्यभिप्रेत्य लिंगदर्शनभाष्यमनुसंधत्ते। द्रव्यार्जनं च प्रक्रा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अंगभूतद्रव्यार्जनारंभेणैव प्रधानारंभात् तदतिपातनं स्यात् ५
पूर्वपक्षेऽपि ३

तं·व· निसर्वकर्तॄणां प्रक्रमात् अपवाद एष स्वर्गकामो लोकाच्छिद्यते इत्यनेनापि चोपक्रांतानीत्याद्यतिपातयेदित्यंतं भाष्यमर्थतः पठि
तमाह्रिपतिप्रधानारंभविषयमतिपातनं पौर्णमास्यमावास्याशब्दयोः प्रधानयजिनामत्वात् नारंभणमतिपातनं प्रधान
८ [illegible]रंभविषयमित्यर्थः। ततो द्रव्यदात एव लिंगं अंगभूतद्रव्यार्जनारंभेऽपि प्रधानभूतयज्ञनारंभोपपत्तेः। समाधत्ते अथ वांग ऽिति ३
रंभेणैव प्रधानस्यारब्धत्वात् तदतिपातनाभावः। पुनराह्निपतियागाकरणात् अतिपातनं यत्तदितरत्रापि पूर्वपक्षेऽपि द्रव्यार्जना
एवायं यदि प्रधानारंभोऽतिपातनं तदोऽङ्गारंभेणैवारब्धत्वादनुपपन्नं स्यात्। अथ ननु प्रमाने त्वनिपातने संभवत्यंगानुष्ठानेऽपि द्रव्यार्ज ४ऽ
नानुष्ठानमिति नातीव सिद्धांतलिंगतयास्थापनमिति। यत्तु नियमस्यैव कृत्वर्थत्वं पुरुषार्थत्वे विंतयं ततः पुरुषार्थेम
पि द्रव्यार्जनमस्तीति मन्यमानेन तेषां पुरुषार्थस्य द्रव्यार्जनस्य क्रतुसंभावात्तन्नियोगतस्तदनुष्ठानेऽकर्म्मोपक्रमः स्यात्त राम
त्रोपक्रांतानि सर्वकर्म्माणि द्रव्यार्जनेन भवेयुरिति लिंगदर्शनमोष्यमनुपपन्नं स्यात्। यदपि ह्योमवसादीनां क्रत्वेकां ८

संभवत्येव पूर्वपक्षेऽप्यतिपादनमिति ३३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वतः प्रयोगनानुष्ठीयमानेऽनुष्ठीयमाणे विशेषतः सर्वार्थत्वान्नदनुष्ठानेन २ अङ्गो तानांच्च वश्यसमापनीयत्वादीश्वरेणापि च सर्वेसमापनस्यदुःशकत्वा २

तद्रूपसंबंधः पूर्व[illegible]पक्षेलभ्यतइत्युक्तंतदपिपुरुषार्थस्यापि ऽद्रव्यस्यसिद्धांतवत्पूर्वपक्षेपिसंभवादनुपप
न्नं स्यादिमास्तांतावत् क्रत्वर्थेषुद्रव्यार्जनेसतिसर्वक्रतूनांप्रक्रमाद्युगपत्सर्वानुष्ठानासंभवादन्यतरानुष्ठाने
प्यनध्यवसायादशक्नोयोर्थः स्यात्केषिविरोधात् अपितुयदिशास्त्रात्कर्मार्थंद्रव्यार्जनंतत्तर्हिनामत्रजीवनादौ विनि
युज्येततत्तथार्जितंद्रव्यंतत्रजीवनलोपात्सर्वतंत्रपरिलोपः स्यादितिमाष्यार्थमाह क्रत्वर्थंचद्रव्यार्जनेसतितथार्जित
9 स्य क्रत्वर्थत्वेनार्जितस्यामत्रविनियोगाच्छरीरनाशात्सर्वतंत्रपरिलोपः स्यात् ननुपुरुषार्थार्जितनजीविषातः
स्यात्तत्राह न च पूर्वपक्षवादिनोद्रव्यार्जनेविधीयते एवं क्रत्वर्थं अपरंपुरुषार्थमिति किंतर्हि क्रत्वर्थएकमेवेदं उ
तइमतआह द्रव्यमुपाददानस्यैतेप्रतिग्रहादयोनियमाउपदिश्यन्तेपुरुषस्य तिहेतोः द्रव्योपादानमात्रोद्देशेन
नियमविधानात्तत्त्रास्त्रस्य क्रत्वर्थत्वेतिपूर्वपक्षवादिनोमतमिति यत्तुसर्वतंत्रपरिलोपक्रत्वनुष्ठानपरिलोपं

अतएवहिक्षमिवत्यादीनांक्रत्वर्थत्वेनापूर्वपक्षेदर्शितः अन्यथाक्रत्वनेकांतद्रव्यसंबंधाश्रितत्वंननुल्यतास्यात् तेन पूर्वपक्षोद्रव्यार्जनविशेषोद्देशेननियमविधिः किंतुद्रव्यार्जनमात्रा
केनतन्मात्रेणनियमविधानादन्ययोपात्तंद्रव्यं ... क्रत्वर्थमेवेत्यन्यत्राविनियोगात्सर्वतंत्रपरिलोपोहणमुच्यतइति २ पाठांतरे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Shareda Peetham

ते.च. यावज्जीवतेषामर्थैर्थस्यावन्तवाट्नेकर्मार्थमुपात्तमनन्यत्वविनियुङ्क्तेति कर्मभेदोनेतीति हि गम्यते। न च कर्तृ
८ त्वातल्लोपः शक्यतेवक्तुं। तेषां हि मध्ये नियममात्रस्य पूर्वेपक्षे कर्मार्थत्वात्तत्तुसर्वस्याङ्गेनस्यातेननाङ्गितिंइत्थंसर्वस
र्वेङ्कर्तृनामंगयेजन कोविहितनियोगेन युक्तः स्यात् तल्लोपस्थितेकस्यचित्कर्मणोनुष्ठानेकर्मार्थइत्यसाङ्गेनेतवाग्र
तिग्रहादिनावापूर्वेमङ्गिलस्य संकल्पवशान्नत्त्वकर्मार्थत्वमेवापादयतीतिनस्यवार्थता। तथाह्यनेकपुरुषसाधारण
सेवानेककर्तृसाधारणस्यापिसंविभागेनासाधारण्यसंपाद्यसंभवत्येवानुष्ठानं। तथा दर्शपूर्णमासयोः सहा
वह्नीतीतिवत्तत्रसंसृष्टब्राह्मणादिद्रव्यमानेयाग्नीषोमीयसाधारणमपितिमङ्स्यप्रत्यक्कर्मणोनुष्ठीयते। यद्यपितत्रप
रमापूर्वमेकमस्तितथापि प्रत्येकं कर्मार्थता विभागेनैव क्रियतइतिनास्तिकर्तृत्वतुष्ठानलोपः। तस्माद्यथोक्त एवमा राम
ष्यार्थः। एवंचसतिप्रयोगकालाद्बहिरेतदंगसदनुपकारकंस्यादितिमाशंक्याख्यानुमतनुमाषितं। तत्राशंकाऽतिप ८

CC-0: Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नेत्यातिपातनंग्रंथान्यरत्नस्तेग्रंथमुक्तष्यतछेपत्वेनायंग्रंथोयोजनीय इति २

ॐ

ततग्रंथानंतरमिदं भाष्यं कथं सर्वतंत्रपरिलोपानंतरं व्याख्यायत इति तत्राह। अंतरेणातिपातनं ग्रंथेतनायं ग्रंथः संबध्य
ते। कंतहि किं न तहि संबध्यत इत्यर्थः। तत्राह सर्वतंत्रपरिलोपः स्यादिमस्यायं ग्रं। तेनायं भाष्यार्थः। प्रयो ग काला
द्बहिर्भूतमपि यदेतत्दंगत्वेनाभिमतं तदेवं सति सर्वतंत्रपरिलोपप्रसंगे सत्यनुपकारकं कृतो। स्यात प्रयुक्तविद्याज
कमेवस्यात्। नारीरविद्यातेनुष्ठानविद्यानादिति। यथानाश्रित्य जेवापूर्वे ग्रंथे शकरत एवायं ग्रंथोव्याख्यानुमितिम
त्वाव्याख्यानंतरमाहाथवाप्रयोगवचनवहिर्भावात् अप्रकरणस्थत्वान्नेदं फलवंतोरंगा। नचाप्रकरणस्थस्या
पिजयादिवत्श्रुत्यादिभिरंगत्वं तदभावादित्याह श्रुत्याद्यभावात्। आरूप स्य चायमर्थः। एवं च सतीति न पूर्वोक्तो
पजीवनं किं तर्हि एवं सति इव्याजेनस्पष्टक्वथ्येतेसतिश्रयं दोषः। निःप्रमाणकत्वं। कथं यदेतदंगत्वेनाभिमतं इज्याङ्गं
नंतत्प्रयोगवचनसंयोगजिघृक्षायावंतं कालं मनसि विपरिवर्ततेतस्मात्कालाद्बहिर्भूतं यस्मात्बहिर्भूतत्वादित्यर्थः। अ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं॰च॰ नंगंस्याद्दितिनत्वनुपकारकमितिभाष्यं।तत्कथमनंगमितिव्याख्यायते तत्राह।अंगत्वेनाप्रतीतेःनुपकारकंस्याद्दि

१० तिफलेनायंग्रंथः।अंगत्वस्यफलमुपकारकत्वंतन्निराकरणद्वारेणांगत्वनिराकरणमेवेदमिति।एवंचसन्निधि

त्सिद्धांतोप्यंकमेकस्याधमावादनंगंक्रत्वारिस्युक्तंतदस्येवभाष्यस्यप्रतिपाद्यंसत्प्रधानहेतुन्यथातत्रोक्तेऽददानीमा

ख्यास्वंदक्रियतइतिवेदितव्यं।व्याख्यानांतरमाह।अथवाप्रधानकालत्वादंगानामन्यास्मिन्काले क्रियमाणमनुपका

रकंस्याद्दिति।नत्वाधानवत्प्रभवितुमर्हतीतिभाष्यस्यवरमेव्याख्यानेतदेकवाक्यतयाव्याचष्टेयथाधानमन्यकाल

मपिप्रधानस्योपकारकंनैवमिदंइज्याजेनंकुतःकालविधेरभावात्।आधानेहिकालविधिरस्तिवसंतेब्राह्मणो

ग्नीनादधीतेति।नस्मात्क्रत्वर्थंसदंतसंतंत्रमुपाद्यंस्यात्।एतदेवदर्शयति।एवंकतुःप्रक्रांतस्तमेवारीहेकस्य राम

इज्यामुपादत्ते।उपादेयमित्यर्थः।ततःकिमित्यतआह।एवंचेत्संतत्रंइज्याजेनेक्रियमाणेसत्ययमधिनाबोनवतिन १०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तदेव दृष्टान्तेनोपपादयति

सर्वकर्मणि प्रक्रान्तानि मे त्वेषु॥ यथा वहंति पौर्णमास्ये क्रियमाणे तत्सौर्ये सांगमिति तत्तदनुष्ठाने सौर्यस्योपक्रमो ऽ
वतिष्ठते एवमिहापि तान्यस्य कर्तारं ततः स्फुटं कार्त्स्न्येन कर्तव्यं तन्त्रमुपक्रान्तं करोतीति तावद्रूपं समापनीयं स्यात् तस्मा
त्क्रान्तस्थेत्वे सत्तिकालविरोधाभावात्सर्वकर्मप्रक्रमदोषपरिहारार्थं प्रतिकर्म झट्यावृत्तेनैतत्सर्वकर्मणां तन्त्रेणेति युक्तं।
नचैतद्दिष्टं न वसंभवमिति क्रतुविलोपप्रसंगात्। कदाचिद्विक्रतुः प्रक्रान्तः स्यान्नच प्राप्ताश्च मातंद्वयं लभ्यते। तस्मा
न्न क्रमवस्थे मिति व्याख्यानान्तरमाह न च आधानवद्भवितुमर्हतीति यथाधानमग्न्यर्थं तत्कालवर्थेनापि पुरुषार्थमेवं द्
व्यार्जनमपि केवलं द्रव्यार्थमेव कस्मान्न भवतीति निराकृतस्य पूर्वस्य पूर्वपक्षिणः सिद्धान्तपक्षि बन्धमानफलं
बोद्धं। पाश्चात्यस्य वाक्यस्य विदानां कालेन निराक्रियते। अस्मिंश्च दर्शने न कालतानदोषः न च सर्वार्थमप्रसंग इति। नि
राकरणाभिप्रायमाह। अपि तु आधानस्य वाक्येनाप्रार्थ्यतावगतावसंते ब्राह्मणोऽग्नीनादधीतेत्यत्र पूर्ववाक्याभ्यां कालवि

ति आनेपि विभियोगे विशेषणविशेष्यभावो वाक्याद्यन्नइति वाक्येनेत्युक्तं। वाक्योदाहृ ती४ पक्षे रागभाव्ये वतत्र हिव वनंब्राह्मणोऽग्नीनादधीते ४१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं.व. धिघोत्तनायत्वसंतपदमुक्तेः पठितत्वंइदानींचुद्वितीयांतमशिषदमन्यर्थत्वघोतनायोक्तेःपठितत्वमिति। अस्यपुनर्ई्या
१२ र्जतस्यानार्थत्वेप्रमाणंनास्तिप्रसिद्धोणातुपुरुषार्थतान्वगम्यते। नव्वर्जतस्यैइवार्थतास्वभावादेवसिद्धा।पुरुषार्थता
पिचासतद्वारेणैव तद्वाराद्रुपक्रियारूपेणतत्कथमन्यार्थत्वेप्रमाणंनास्ती।नाशंकेयात्तरत्वेनसैवमाषस्यामित्रार्थां
तरमाह्य वाजुआधानेनायुगयन्तत्याद्यंतेतनस्तस्यतन्मात्रार्थतायुक्तानवर्ततेनातेनक्रीह्यादयउत्पाद्यंते। अतो
नतस्यनूपमन्नार्थेमर्जनंतद्वारेणत्वन्यार्थमेवा। अवघातादिवन्ननकत्वर्थत्वेप्रमाणाभावात्पुरुषार्थ
त्वमिति।माषंवायानादधीतेतिनिर्वर्त्यकर्मामिधायिद्वितीयापदर्शनपरंमाख्येयं।अश्नीतादधीतेतिनिर्वर्त्यकर्मा
मिधायिन्योद्वितीययाश्नीनांनिर्वर्त्यत्वावगमान्निर्वर्तकमाधानंतदर्थमितियुक्तंतत्वेवमर्जनमिति। तत्पुनरिदंमंदमिवोत्र राम
रंअनिर्वर्तकस्यादितादर्थ्याविरोधात् निर्वर्तकस्य १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पिं संयवनस्य पुरोडाशस्य तदुपार्थत्वानभ्युपगमान्निर्वर्तकं प्रापकमिति। विशेषमाज्ञामीमांसकः पुनरेतदेव भाष्यमुत्तर
त्वेनयोजयति। अथ वाद्रव्यार्जनकर्तृप्रो नियमः फलवत्त्वात्पुरुषार्थोऽस्तु स्याहि पुरुषे फलं प्रतत्त्वमेव। आधानं तु
न पुरुषार्थं तत्र फलाभावात्। न क्रत्वर्थं श्रुत्याद्यभावात्। अतोऽर्थमेव तदिति यद्येवं व्याख्या। पुनः आधान
स्य क्रत्वर्थत्वं न प्रधानानां क्रतोरन्यत्फलमस्तीत्यप्रयुक्तेः षामर्जनं स्यात्। तेनाधानविधिना तावत् तेषामर्जनं कामश्रु
तिर्निर्वा। तत्र प्रतस्य विधिविहिताधानार्जिताग्निनामेनकामश्रुतयस्तदर्जनोपायं क्रयणादिकमाहिपंतीति पुनः
माधानविधिरक्रत्वर्थोऽपि क्रत्वा वैवं नियमं फलतीति। एतेनाधायत विधेरपि नियमार्थता व्याख्याता। न त्वेवमर्जनस
संभवति इत्यास क्रतु संबंधमनपेक्ष्यैव पुरुषे लवत्त्वान्नियमविधिरतेति उपभोगात् एवं तस्य प्रयुक्तिः संभवादसत्यप
र्जने विधानक्रतोरङ्गैकत्वमापद्यत इति नतद्यानिबंधद्वारेण नियमफलत्वमक्रत्वर्थस्यार्जनस्य संभवति। तस्मादवश्यमस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पा२

तं.व. क्रत्वर्थत्वंपुरुषार्थत्वंवांगीकार्यंइतरथाविधिवैयर्थ्यात्।तत्राप्रकरणेस्थत्वात्पुरुषार्थत्वमिति।भाष्यमेपार्श्वंव्याख्येयं।
अग्निमादधीतेत्यनंतरोयानमप्रयोजनारंभार्थत्वमाधानस्यायमतइति।भाष्या नंतरमाह।अथवाधानमुद्देनाह
१२ वनीयादयोग्निर्धार्यंतेलक्ष्य पाद्याकस्तदाभवत्यर्थः।पूर्वग्रंथस्पहिहितायेव्याख्यानेप्रयोगवचनबहिर्भावात्तनांगत्वं
दुर्व्याजेनेत्यर्थः।प्रदर्शित।तत्रयथाबहिःप्रयोगंप्राहिताअग्नयोंगत्वंप्रतिपद्यंतेएवंकस्मान्नभवतीतिपरिचोदि
तेसत्याह न वाधानवत्तर्भवितुमर्हंतीति।नवैतदाहवनीयादिवत्तर्भवितुमर्हतीत्यर्थः।कुतः।तत्र आहवनीयादयो
ग्नीनादधीतेतिवाक्यविहितेनाधानेनोत्पादिताः।किमस्माभिःप्रयोजनमितिसाकांक्षाःसंतोवाक्येनपदाहवनीयेजुहु
तीतिअनेनहोमांगतांप्रतिपद्यंतेविनापिप्रकरणेन।इहचस्माग्नेनेताहृग्गंतास्तिवाक्यंयत्तद्व्यार्जनंचकर्मणिवि ग.म
नियुंजीमा।घेवाधानवाक्याद्धाहरणंयदाहवनीयेजुहोतीत्यस्याप्युपलक्षणार्थमितिव्याख्येयं।अथयल्लिंगमुक्तमिति १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

माधुपपद्यतइत्यतंतंभाष्यमर्थतोनुभाषते॥हदाहेगत्वायवाफलायवेति।अत्रफलार्थैत्वंतदेवाभिमतं।अंगत्वंत्वनभि
मतमेवेतिदर्शयति।अंगत्वेनास्तिप्रमाणंतदभिधानंत्वनास्थया।नह्यनेनतद्व्यार्जनस्यपुरुषार्थत्वंव्यावर्त्यतइति।
यद्वानैमित्तिकानांकर्मणामफलत्वमिष्टं।तेनैवभाष्येणदाहनिमित्तानामपिश्राद्धादीनांफलवत्वप्रदर्श
नेननिराकृतं।सूत्रमपिसर्वपुरुषार्थानांप्रीतविभागंदर्शयतीत्यस्मिन्नीतिशिष्टं।अविभक्तत्वादिति।प्रीत्याऽवि
भक्तत्वंपुरुषार्थत्वेहेतुंदर्शयन्नाहदृष्टस्यनास्तिपुरुषार्थत्वेनिदर्शयति।यत्वस्यप्रत्याख्यानंपुरुषस्यक्रतुसंबं
धाविभागादिति।तदपिभाष्यविरुद्धमिति।भाष्यकारोह्यविभक्तोहिपुरुषार्थः।प्रीत्येतिप्रीत्याविभागंदर्शयति।युक्ति
तोपिनैषपक्षोघटते।इतियच्छाद्वाक्ति।निर्णयेनिर्णीतमित्यस्तांतावत्।तत्सिद्धंप्रीत्याविभक्तत्वाद्व्यार्जनंपुरुषार्थ
मिति॥ ॥तदुत्सर्गे॥ ॥यद्यपिप्रीत्याविभक्तत्वाद्व्यार्जनस्यपुरुषार्थत्वेपिफलकल्पनाभावात्पुरुषार्थतापिसुत्सर्गे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं.च. न हि प्रजापतिव्रतानामप्रकरणस्थानामपि फलकल्पनामयाजकवदर्थेवमस्त्विति प्रस्तूयते । तत्र प्रतिषेधत्वादेकवा
क्यत्वे वाक्यार्थत्वं युक्तमित्येतत्प्रतिपादयन्प्रतिषेधत्वं समर्थ्यते नोद्यंतमादित्यमीक्षेतेति न त्वनुद्यदादित्यमीक्षेत धातवः क
१३ तैवतावचनेन संबध्यंते । कर्तव्यतावचनः प्रत्ययः तेन यथोद्यंतमादित्यमप्राप्यकर्मतया संबंधो यथेक्षतिधा
तोस्तेनैव करणतया संबंधईक्षणेनादित्यं प्राप्नुयादिति न तु परस्परं कारकाणां क्रियाग्रहणेः समन्तोन्यसंबंध
भावात् । एवं नञोपि तेनैव संबंधो न प्राप्नुयात् उद्यंतमादित्यमीक्षेतेति । न त्वन्तरकारकेण । यतः पर्युदासेन
नीक्षणविधिः स्यात् । कुतः इमाहणं प्रत्यय संबंधेश्रुतिर्हि नानिमभवंतिन लक्षणाहत्वानि यदा तु नञुपपदयोः संबं
धस्तदा [illegible] स्वार्थो हि त्यावस्त्वंतरं लक्षयंति । यदा तावन्नञ्धात्वोः संबंधस्तदाप्रसज्यार्थस्य भावस्यानिषिद्धस्यावस्थि राम
तत्वात्तरकरणोपेक्षायां तत्करणतया ह्यभासहितामांसार्थो विनाभावात्संकल्पः स्वार्थो हि त्याप्रतिपादनीयइतिल १३

पत्र जि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क्षणा। यदा पुनः पदादिसेनतं संबंधस्तदापितत्स्य निवृत्तिस्तन्मात्रतदतिरिक्तसर्ववस्तुनो भावनाकर्मत्वयाप्रतिपादनाल्लक्ष
णैव। उपपदाऽनियमाभिप्रायेण लक्ष्यंतीति वक्तव्यं न येनैव केनचिदुपपदेनाख्यातं परिहाय तत्र संबंधस्तेनैव स
हासौ लक्षणा इति भेदोऽनेनेति। उदाहरणवक्तुर्वापेद्वं चावक्तुर्वचनं आदित्यसंबंधस्यासिद्धत्वान्नाप्यनंगीकरणं। तस्मा
ल्लक्षणादोषात्प्रतिषेधः। तथा च वक्ष्यते पर्युदासे सत्यपि यत इदं प्राप्तिपूर्वकः। ततः किं प्राप्तिस्तु दर्शपूर्णमासादिषु
विद्यते सा प्रतिषिध्यते। अयमर्थः प्रतिषेधस्य वक्तव्यं प्रतिषेधस्य पूर्वप्राप्तिरालोचनीया सा चालोच्यमाना प्रतिषेधस्य
वैदिकत्वात्तत्सामान्यनवैदिकत्वाज्जृम्भणपि तिष्ठते न तत्सा इति षष्ठप्रतिषेधोऽपि न हारणाकं वेर्थ इति। एवं च सति पु
ले न कल्पयितव्य मित्तत्स्थाने कल्पनागौरवं स्यात् तथापि नैष प्रतिषेधः किंतु नीक्षणं नाम मानसः करणसंकल्पः प्रति
यमितत्तथापि फलकल्पना मयात्र कार्यं वर्थं एवायं नियमः। न चैतावता हेत्वसाऽयुक्तो भवतीत्येतान्निवहेणास्य फलस्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं·वं· वणान्न फलं कल्पयितव्यं अत आह। फलार्थवादोयं न फलविधिरेतुं वराधिकरणान्निषेधात्। एतस्मिंश्च पक्षे विश्व
जिदादयोपपन्नोदाहरणं रात्रिसत्रादयश्च। विश्वजिदधिकरणे हि सर्वेषामनारभ्यवादानामश्रुतफलानां क्रतुसं
२५ बंधप्रमाणश्रुत्यादिशून्यानामफलत्वनिराकरणेन फलवत्त्वं साध्यते। न तु फलेन कर्तृप्रकारः किंतु पुरुषार्थ
रूपं किमपीयतदधिकरणगोचरः। न हि विशेषश्चेतावतु तत्सर्वार्थमनादेशादित्यादिषु हि रूपं गार्यमित्यत्र तु स्वर्ग एवाधि
न्नधिकरणे द्वितीयार्थसंयोगाद्धि भिन्नाधवार्थपुनः कर्त्वर्थत्वमात्रं कल्पनीयं क्रियतइति चासंकरो वेदितव्यः। एवं प्रा
प्तेनूमान्तयत्नादुक्तं प्रतिषेधोयमितितत्राह। नायं प्रतिषेधः। कुतः तत्सदृशत्वप्रतीतिर्हि प्रकृतस्यतो घृतमादित्यमासादेनेति
वचनेनान्तः। किं इतमितित्वसामान्येतत्कर्माख्याने तन्तु सामान्य विशेषणाकांक्षमाणमनेनाविशेष्यतो यत्र किमपि कर्मावि राम
हितं तदिदं नो घृतमादित्यमासीदेतेनादि। प्रतिषेधेसति पूर्वसामान्यवचनं साकांक्षमेवावतिष्ठेत ततश्च प्रमाणं स्यान्न २५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

६

हि किं चित्कुर्यो द्दिस्येतावन्मात्रं कस्य चिद पार्थ्येस्य प्रमाणं भवति। न च विशेषप्रमाणं किंचनास्तीत्यप्रमाणमेव ज्योथे
ता॰पेत्यापि विशेषाद्वे पप्रवर्तते न च सामान्येनाश्रुतः कर्म्मविशेषश्चाह्नेपेण स्ट्ह्येत। एवं च सति वाक्यभेदात्पूर्वोत्त
रयोर्मिथः संबंधाभावात् द्वाभामर्थ्वे द्वयविधानात् हि रहष्टं कल्प्येत। पूर्वं च कल्पयित्वा पुनस्तत्रापि फलं ते न महष्ट भेद
पि सामान्येकयात् क्रियया भावनेर नियता नं युक्त वंतेष्टकृत्वो ध्वशब्दणाङिति वदेवं प्रतिषेधे सति वहुसमंजसमतो
स्मा द्धिरेथान्तत्रकर्त्तमतावचनेन संबध्यते। तस्मात्तु प्रसुत्तः तदनंतरेण द्वाति ना संबध्यतेऽतो नान्वयेन रूपेणनि
यमार्थं कर्तृधर्मोद्द्योधतो नन्वस्तु नियमस्तथापि कर्त्रं कर्त्तृधर्म्मः फलकस्य [illegible] तामयाश्च कर्मधर्मत्वमेव युक्तमत
ग्राहत्व[illegible]र्थवाक्येन विपरिवर्त्तमाने तेनाक्रिकर्त्तं संतंश्चः श्रुत्साध्यसावात्तना [illegible] क्रिकत्तुना संबंधः क्रियाद्वे पादेव
हि कर्तृविवक्षामते। तेन तत्कृतमेव क्रियाया भावसंगा कर्तुमुचितं न कर्तुगतं। न स्यकेन विदपि प्रमाणं ताबेन तु द्वावना।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं.व. रोहणात न यथाप्रमाणकं लक्षणं गीकर्त्तुमुचितं प्रमाणव्यवस्थापनं वा गुर्वपि तु न च गौरवमस्ति प्रकरणपठिता
नांश्रुप्रकारकांदेणाज्ञाश्रो प्रस्थापितेन क्रतुना संबंधात्तक्रियाक्षेपतः स्वरूप मात्रेणावगतेन पुरुषेणासंबंधो
१५ गरीयानिति नाश्रीयते। अत्र नारम्भविहितानां त्वसंनापतीतक्रतुसंबंधानां पि लक्ष्ययातेवा विधिरपि च विषय
स्य समीहितसाधनत्वबोधय न विशेषप्रमाणाभावे साक्षादपेक्षितफलसाधनत्वमेव बोधयति। जेनक्रतुक्रतु
प्रीत्युत्सर्गेपि यद्यपि नैतेषु प्राप्तिः श्रूयते गोदोहनादिव तथापि ह्यपतेद्र आर्जितवत् तथाप्येवंजातीयकानि क
र्माणि पुरुषार्थानि शास्त्रस्य विधेरनतिशयं कात्वादिति। न बहुत्वं विकीर्षितस्य स्वभाव दर्शयति स्मात्
तिशयं कत्वादिति क्रत्वर्थेपि तुल्यत्वान्नायं हेतुः पुरुषार्थैकांतिक इति कस्यचिदाशंकायामपादितित्रिवृत्तमर्थमुक्तं राम
न बहुत्वं विकीर्षितस्य इति। तत्र व्याचष्टे न च क्रत्वर्थे बहुत्वं संस्त्रिक्रियते वा। प्रदर्शितमेतत्त्वा प्राप्तिरिति र्द्धतरपि १५

पुरुषार्थाय३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नसामर्थ्यात्तस्य संबंधेनतन्मुखेनप्रणाड्याऽक्रत्वर्थतास्यात्। क्रतुसंबंधिद्रव्यसंबंधेहिसतितत्संबंधोदेवपर्णमयीत्ववत्क्र
त्वर्थतास्यान्नचैतदस्तीतिकः पुनरुत्पत्तिप्राप्तिविकृतिसंस्कृतीनांभेदः। उत्पत्तिर्नामयेनाकारेणकारकमभिधानेनोपात्तंतस्यासतः
वोत्पादनं। तस्यैवसतोऽप्राप्तस्यप्रापणंप्राप्तिः। तद्गतद्दृष्टातिशयोत्पादनंविकृतिः। सतएवादृष्टातिशयोत्पादनंसंस्कारइतिच तस्यैव
तः पुंपुरुषार्थोऽन्यजाति। किंपुनस्तानिकाम्यात्पथनिसानीतिचिंत्यं। तत्रकश्चिन्नावदाहफलार्थिनाकार्याणीत्येवमर्थेउप
देशएवांविश्वजिदादिवदितिमत्याभिप्रायः। तन्निराकरोतिनेति। नफलार्थिनाकार्याणीत्येवमर्थेउपदेशः। किंतर्हीत्याहति
त्वत्वेनसंबंधेनसनादिवत्। एतावतानैनसाऽयुक्तोभवतीतिवाक्यशेषेपापत्वेपश्रवणात्। तत्प्रयोजनमेषांरात्रीण
मिवप्रतिष्ठानोद्यंतमितिवत्प्रत्ययोनिमित्ततामेवादिमोदयस्प्रतिपादयतीतिवह्नामः। तस्मान्निमित्तफलवत्त्वा
न्नित्यवत्तद्वस्तुत्वादितेतदीक्षणाभावः संकल्पयितव्यः। नोद्यंतमीक्षेतनास्तंयंतंननभोमध्यगतमित्यादि। आहत्वान्निसं

16

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं·व· धंज्ञयत्तानेनसावित्रीनेद्दइत्पयं। आदित्यंध्यायताकार्येः संकल्पः पापनाशनः। अत्रचोदयति यदुक्तमनीक्षणं विधीयत
इति। तदयुक्तमीक्षणभावोद्यतीक्षण म भावत्वाच्चकर्त्तव्यतानघटत्ते। अभावेहिकर्त्तव्यो विधीयमानेकर्मविशेषावि
२६ धानात्तद्वतप्रक्रमविरोधस्तदवस्थइति। परिहरति। सत्यं। तामावस्पविधिर्भावएवत्वक्लक्षणपदाविधीयते संकल्परूप
इतिप्रतिपादयन्लक्षणानिमित्तंसंबंधं दर्शयति। सर्वत्रप्रवृत्तौ निवृत्तौवाकर्त्तव्यायांमानसंव्यापारमंगीकृत्य पूर्वसं
कल्पंकृत्वाततः प्रवर्त्ततेनिवर्त्ततेवा। तेनात्रापनीक्षणंकुर्वीत आदित्यस्यानीक्षणंकर्त्तव्यमितिमनसासंकल्पयति। ततोनी
क्षणस्यईक्षणाभावस्यमानसोव्यापारः संकल्पाख्यः कारणत्वात् तदविनाभूतत्वात्तस्माविनाभावादीक्षणाभावः शब्दाभिहितः
न्नाक्रोतितंलक्षयितुंप्रत्युक्तिः। किंतेनेहसंकल्पोविधीयतइति। ननुस्पर्शादीनामपिक्रियात्वादीक्षणव्यतिरिक्तत्वेनतद् राम
भावसंबंधात्किमितिनलक्षणास्यादित्याशंक्याहस्पर्शादीनामभावसंबंधात्। तदविनाभावाभावान्नतेषांकर्त्तव्यता। ततो २६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

घंतमादित्यमितमस्यवाक्यस्यनायमर्थो यद्घंतमादित्यंपश्येदिति किंतु घंतंनेदृश्यमिति संकल्पयेदिति। अपिचपुरुषप्रयत्नः कृतिरि
त्यादिभावंमात्रवत्सकर्तव्यार्थत्वेवसति विधायकः कर्मोत्पत्तिमात्रनिष्ठ एवस्यात्। अत निग्रहणं विनियोगस्याप्युपलक्षणार्थ
मेवं वसतियदेवास्यप्रत्तादर्थोप्रतिपादकत्वमदः। तत्प्रयोगप्रतिपादकत्वमित्यर्थे सत्येव हीयेत। नत्वनेनविनियोजकत्वहा
निरभिधीयते अंगविधीनामपि विनियोजकत्वम् जकत्वाभ्युपगमात्। नहि प्रयोगवचनेनांगत्वं सिध्यति। अंगंसत्प्रयोगवचनेन
गृह्यतइति नतु प्रयोगवचनादंगत्वं। तस्मात्प्रयोजकत्वं हीयेतेत्ययमेवार्थः। कुतो हीयेतेत्याह प्रयोगवचनेनकृतत्वात्।
17 तस्मात्स्पष्टत्वोग्रहीनत्वेऽथ तत्रविधायकोर्थवान्। एवंचयत्प्रयोजकत्वंमाकल्पीति विश्वजिदादीनांकाम्यत्वमिष्टं जिति
निराकृतः। प्रयोजकत्वस्यैवसमर्थनीयत्वात्तत्सिद्ध्यर्थं नैमित्तिकत्वमेवयुक्तमितीयत्विहसमिदादीनामंगत्वसम
र्थनं तत्र प्रजापतिडत्तवैषम्यप्रदर्शनमात्रार्थं नतु प्रतिपाद्यत्वेनेति मंतव्यं। प्रकरणाधिकरणे प्रतिपादितत्वात्। यदि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं.वा. वाक्यप्रतिपाद्येनाधिकरणभेदः स्यात् दर्शनस्थयेव चतुर्थे सिद्धं प्रधानापूर्वेदमर्थमंगीकृत्य प्रकरणाधिकरणं करणेदमर्थो प्रतिपा
दनमात्रपरं मन्यंते तेयद्यत्रत्पमभिधानममंगीकृत्य तथा मन्यंते तत्र्हि युक्तं मथपुनरिदाधिकरणे तत्संनिधावसंयुक्तं तदंगंस्या
१७ दित्येतदंगीकृत्य तथापि नयुक्तमित्याशयमात्रप्रधानमनिरूपकरणपरत्वात्तस्या संग्रहायाणपाधिकरणे च फलवद्दोत्तेकहेतुत्वाद्दित
रस्याप्रधानमितिफलवदंगत्वमितरस्य प्रसाधितपूर्वं वदत्वेन द्याधिकरणविषयत्वमस्यास्ति दर्शयति किंचैवंचा दितामतर्थ
कमेव प्रकरणाधिकरणमापन्नं । किं तेनाः हि येन प्रतिपाद्यं करणेदमर्थो मिति चेत् केन प्रमाणेन । प्रकरणेन । किं पु
नः प्रकरणं । प्रधानापूर्वमिति कर्त्तव्य संकः तावद्दि प्रकरणमित्युक्तं भाष्यकारेण कथं पुनस्तेन करणेदमर्थं परिक
ल्पते प्रधानापूर्वं हि स्वशब्देन संनिहितैः प्रयाजादिभिरुपसर्जनीभूतैः प्रधानतया स्वितमभिधीयमानं तेषां स्वार्थत्वेस्व राम
पदावगतकरणावरोधात्करणेन यानसंभवतीति तन्निष्काशर्थे स्वापेक्षितेतिकर्त्तव्यतां ग्रात्वं तेषामाक्षिपत्करणार्थत्वं परि १७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कल्पयतीति चेत् देवत्तं हि लिंगो गाह्ये पोत्रप्रमाणमुक्तं स्यात् प्रोक्षणादीनामिव करणे दमर्थो। सव चतुर्थ्यो घे सा। येन इति
छ्यरंगाधिकरण मपेक्षते तेन संयुक्तानां क्रत्वर्थत्वपरिकल्पनमुपादानमसंयुक्तानां तु प्रकरण मिति संज्ञाविशेषः का
र्मक्रियतां। अधिकरणे हि तयंतुपायामेदाद्युक्तं। प्रोक्षणादीनामपि क्रत्वंग भूत द्रव्यादौ श्रुत्यादिभिर्विनियुज्यमाना
नां तत्प्रमाणमेकमेव क्रत्वर्थत्वमिति कल्पमुपादानेन तादर्थ्यप्रमाणेन। तस्मात् श्रुत्यादीन्येव तादर्थ्ये प्रमाणमपूर्वार्थे
ष्वपि तान्येव प्रमाणं न तु ग्राहकग्रहणं नाम किंचित्। प्रयाजादीनामपि प्राकरणिकमेवापूर्वभावनाङ्गत्वं। तदेव
प्र वंकरणाधिकरणे सु साध्यते। अत एव भाष्यकारः प्रजापतिव्रतानां श्रुत्याद्यभावात् पुरुषार्थत्वमित्याह। इतरथा ग्रा
हकग्रहणाभावादेसे वा वत्स्यादित्स्पलमनया प्रसंगागतत्तीर्थान्तरदूषणकथाविस्तरप्रस्तावनया। न त्विदं प्रजापति
व्रतानि पुरुषार्थानीति॥ ॥इत्याशेतु॥ ॥उक्तं पूर्वाधिकरणे तथा च लोकभूते क्रिमस्मिन् सूत्रे च असंयुक्तानां फलेन

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरणान्तरेऽकत्वर्थत्वं। स्फ्यादीनामर्थेन। निर्वेदश्चायज्ञायुधानीति फलासंयुक्तानां प्रकरणेन विनियोगात्प्रधानार्थत्वं प्र तं.व.
सक्तं निवार्यत इति संगतिः। अध्यायसंगतिश्च प्रयुक्तिविशेषफलतया। पूर्वपक्षे हि प्रधानप्रयुक्तानि स्फ्यादीनि सिद्धा
१० नीत्यूहनं न हि प्रयुक्तानीति। न तु रत्नीय एवैषां यथासंयोगं विनियोगेनोहननाद्यर्थत्वं सिद्धमतः किमत्र चिंत्यत इत्यत
आह प्रदेयत्वेऽपि हि निराकृतो रत्नीयचिंता। किं सर्वेषु हननादिसर्वैः कार्यमुत यथासंयोगमिति। इह तु प्रदेयत्वे मंत्रा
नां करणत्वा क्रियत इति पूर्वपक्षमाह एतानि वै दश यज्ञायुधानीति विधिरयं यागसाधनतया स्फ्यादीनामप्राप्तानां कु
तः स्वार्थत्वाद्यज्ञायुधशब्दस्य शब्दसमर्थलाभात्। इतरथा यद्यदुहननाद्यंगतया प्राप्तानामनुवादः ततः परार्थतास्यात्लक्षणा
र्थतास्यात् यज्ञसंबंधस्य हननाद्यायुधेषु यज्ञायुधशब्दः स्यात्। नास्त्येव विशेषोऽतिरिक्ततानि स्फ्यादीनि प्रदीयमानानि संति राम
यागनिर्वर्तनीयानीति ततो भवंति यज्ञायुधानि। तथापि कथं यज्ञायुधशब्दो मुख्यः। न हि साधकतममात्रमायुधशब्दे नोच्यते इत आह १०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व २

19 साधनत्ववचनोयं यज्ञायुधशब्दो । तत्तत्र पदे यत्त्वपक्षे भवति मुख्यः । संयत्साधनवाचिना युधशब्देन साधनत्वसामान्यं यज्ञसा
धनत्वमभिधीयते गौणः पाक्षिकः । तत्र सूत्रे गौणत्ववादे तेन समासं यज्ञशब्दस्तु पूर्वपक्षे मुख्यः सिद्धान्ते तु सोपि लक्षणया तादृक्तत्रथाय
द्रिद्रव्यत्वं नोच्यते ततः प्रणाड्या यज्ञसाधनसाधनमिति कृत्वा गौणः । स्यात् । लक्षणैव गौणशब्देनोच्यते जघन्यवृत्तित्वसामा
दिति । अविशेषेणेति सूत्रपदमपि शब्दमुपक्षिप्य या वदृष्टयागसाधनत्वाविशेषोपि प्रधानयागसाधनान्येवैकश्रमेतानि निर्दि
दश यज्ञायुधानीत्येतानि पदानि साकांक्षाणि प्रकरणेन प्रकृतेन दर्शपूर्णमासयागेन सहैकवाक्यतां यान्ति एतानि निर्द
ष्टयज्ञायुधानि तस्मादेतैः प्रधानयागः कर्तव्य इति । अतो नैषां प्रयाजादिभिरङ्गैः संबन्धः । अथवैतानि वेद शयज्ञायुधा
नीति कर्तव्यपदमध्याहृत्य परिपूर्णमेकं वाक्यं । तत्तु दर्शपूर्णमासप्रकरणे आम्नानात्प्रधानस्यैवांगं प्रकरणेन ता
न प्रयाजादीनां । ननु यज्ञशब्दस्य यागमात्रवाचित्वात्तदनुवादेन विधीयमानानि द्रव्याणि प्रकरणबाधेन वैदितद्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं·च· र्मादिवदंगप्रधानार्थानीतियुक्तमत आह यद्धवीष्यासादयतीत्यर्थप्राप्तमासादनमनूद्य वेदिर्नियम्यते चेद्यामह वीष्यासा
१९ दयतीति अंगपूर्वाह विपां च सर्वेषामासादनमर्थप्राप्तं तस्मात् तत्र प्रकरणबाधेन वाक्यादंगप्रधानार्थत्वायुक्ता। इह
त्वेतानि वैदशायज्ञायुधानीति न किंचिदनूद्यते न सर्वानुवादेन विधीयमानानि द्रव्याणि सर्वार्थानि भवेयुः। किं त्विह
प्रियो यज्ञ इति सकलयज्ञानुवादेन तस्यैतान्यायुधानीति विधानात्सर्वार्थता युक्ता। नेत्याह न किंचिदनूद्यत इमानि न
खलु समासान्तर्भूतयोः पदयोरेकमुद्दिश्य वाक्यमितरद्विधायकं भवितुमर्हतीति निर्णीतमेतत्तत्र वषट्कर्तुः प्रथमभक्ष
इत्यत्रातो तयज्ञशब्देनोद्दिश्य आयुधशब्देन विधानमथ सकलेन समासपदेनार्थप्राप्तं यज्ञसाधनसामान्यमनूद्यते तानी
ति विशेषविधिरित्युच्यते तदप्यसद् द्रव्यत्वात्सामान्यस्य सर्वस्यैवाग्नेयादिषु पुरोडाशादिद्रव्यविशेषविधानाद् द राम
श्वतथाविशेषकथंद्रव्यान्तरविधानं को दोषो व्रीहियववत् विकल्पो भविष्यति। ननूत्पत्तसु सन्निधौ यान्नि विकल्पो १९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

माद्यः समुच्चयस्तर्हि भवतु। सोपि न। निरपेक्षविधानात्। सप्तमेव मेतत्। एवं तु प्रसक्तौ सर्वेष्वाप्तावद्यज्ञायुधसंयुक्तं वाक्यं
मुख्यार्थलाभात् प्रवृत्तिर्विशेषकरत्वाच्च विधिः। न त्वश्रुतानि पदानि विधौ निराकांक्षाणीति प्रकृते नैकवाक्यतायां तिग
न्तराभावात्। यदपि यज्ञायुधानि कर्त्तव्यानीति वाक्यं परिपूर्णमिति तदपि प्रकरणे न दृश्यते। साकांक्षत्वात्। न हि यज्ञांतरविधा
नेनार्थवत्ता संभवति देवताभावात्। वाजिभ्यो वाजिनमितिवद्धि यागांतरविधानेन प्राप्तिसंभवात्। नापि त्रिशेषभिन्नावरुद्धे
वैश्वदेवयागे गुणांतरविधानसंभवः। [illegible] वैश्वदेवयागे गुणांतरविधानस्य
[illegible] इह त्वनन्यगतित्वाद्वचनप्रामाण्याद्विनिष्प्रकृतसंबंधे गत्यंतराभावात् विकल्पो भवत्विति। एवं सति संख्यायां चैक. क्रियायोगाद्
पपधातेद्रश यज्ञायुधानीति। सर्वे त्व हि केनचिद् केता जिन्नेन संख्यानिर्देशे निर्भवतीति नादृहे कयागसंबंधात् उपपत्तेः। सिद्ध
नेनूहननादिनानार्थसंबंधात् संख्यानुपपत्तिः। अथैव सूत्रार्थः। द्रव्याणि स्फ्यादीनि प्रदर्शयेरन् प्रधानयागसाधनानि सु:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नं·न्यु· रन्यथानर्थकत्वादशुधनन्तस्य। अर्थशब्दो निधेयवचनो निधेयस्य गमसंगात्‌लाक्षणिकार्थत्वापत्तेः। अथवानुवाद्यत्वे
नाप्रवृत्तिविशेषकरत्वात् इत्थं वा संख्याशब्दानर्थकत्वादिति। तथापि कथं प्रधानार्थत्वमविशेषविधानात्‌ सर्वार्थत्वं पुनर्‌म
२० तत्क्रमविशेषणेन। अविशेषेणापि विधीयमानानि प्रधानार्थान्येव प्रकरणादिति। आध्यमर्थविशेषेण साध्यं वा
रूपयं। अविशेषेणापि विहितं प्रकरणेन प्रकरणादित्यर्थः। प्रधानस्य भवितुमर्हति। [illegible] ऽविशेषेणेति प्रधानार्थत्वेयु
क्तिरुक्ता। यदि हि विशेषणं गमुद्दिश्य विधीयेरंस्ततो गुणार्थान्यपि स्युः विशेषविधानात्तु प्रकरणात्प्रधानार्थानीति॥
॥स्येन तदर्थेन॥ ॥करणविभक्तयास्फुटेन किमपि कर्तव्यमित्युपेक्षितपदान्तरेण इतीतमनेनोक्तं नन्वेदं ने प्रयोजनं प्रतिनि
राकांक्षत्वात्‌ नान्यत्प्रयोजनमाकांक्षति। निराकांक्षस्य च नयागेन संबंधः। ननु यागार्थत्वेपि प्रतीयमाने कथमुद्धनन्ना राम
द्धितेवनेराकांक्षं तयागेनात्‌ आह [illegible] वाक्यादेषांस्फुटाद्वी २०

नै॰

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नामुद्दहननादिप्रयोजनं। श्रुताचेववाक्यव्यवहारः पूर्वोक्तन्यायेनसर्वत्रनेतव्यः॥ प्रकरणेनक्रतुसंबंधोमेवेद्धानवा
द्रव्यस्यप्रकरणविनियोगस्तत्वाभावात्‌ नभवत्येवैषांयागार्थत्वेप्रकरणंप्रमाणंभवदपिवाक्यात्‌ इडुवेलमितिनक्रतु २२
क्रतुसंबंधोपिवाक्यादेव। साकांक्षाणिह्येतानिपदानिप्रकृतानेकवाक्यतांयांतीत्युक्तं। तत्राह आयुधशब्दोप्यायुधे
ष्वेवशात्रवादिषुप्रसिद्धो। लक्षणयास्रुगादिषुवर्तेत। लक्षणानिगौणहत्वपभिधानंजघन्यवृत्तित्वसामान्यात्‌। केनपुनःसा
दृश्येनगौणत्वंतान्यप्यायुधानिसाधनान्येतान्यपीति। तेनवाक्यमपेतद्गुणवृत्त्याश्रयत्वात्प्रकरणापेक्षत्वाद्ध्या
हारापेक्षत्वाच्च दोषत्रयपरिहाराय द्रुहननादिवाक्यादिडुवेलमितितादर्थ्यमेवैषांनयागार्थत्वमिति। किंवानोविध ॥उ ३॥
मानेद्रुहननादिद्वारेणायज्ञायुधत्वेनुवाद्येसंभवतिविधौलक्षणान्याय्या। अनुवादेतुलक्षणानदोषः। युक्तश्चैतत्‌
समुच्चित्यनुपसंहरति। अतःस्तुतिवादानुवादयोः। अस्तिहिविधिर्यज्ञायुधानिसंभरतीति। तेनसाकंकर्तव्यैकवाक्यभूत

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं.वं. मवगमयमानं तत्पृथक्त्वविधित्वमर्हतीवाक्यभेदप्रसंगात्। अतउद्धननादिद्वारप्राप्तयज्ञायुधत्वानुवादएवायमितियत्तु
दत्रासंख्यानावकल्पतइतितत्राह संख्यावासादनाभिप्रायदेतद्दशतरेणयज्ञायुधानिसंभरतीत्यनेनविधिना
२१ सादितं विहितं तेनैकेनाभिसंबध्यते संख्याहृन्तीरिति॥ सूत्रमपियस्मात्स्वेनस्वेनोद्धननादिनार्थेनसंबंधोद्रव्या
णामेषां दृश्यते तस्मात्पृथगर्थत्वावगमात् यथाशूर्पादुद्धननादिशूर्पमनुरोधेनतद्द्वारेणैतानियज्ञायुधानिसूत्रेसहा
हृतानियद्वाकेनचिद्विशेषेणोद्धननादिवाक्यस्यविधित्वं नयज्ञायुधवाक्यस्य तत्रास्तु पृथगर्थत्वात्पृथगर्थत्वे
नैवाकेनतुल्यार्थे। एकत्रविधिश्रवणादन्यत्रतदभावादिति यद्वाविधित्वेसतिपृथगर्थत्वेनवाक्यभेदप्रसं
गादनुवादइति यद्वासंख्योपपत्तिरियमुच्यते पृथक्कृत्ययोजनञ्चादेशान तदेकत्रनिबंधनासंख्या। तस्माद्यथा राम
श्रुत्यासादनश्रुत्यनुरोधेनसंख्याभांतिसूत्रेइति॥ ॥चोदितौ॥ ॥अत्रगाध्यकारणार्थेकर्मभेलापेयाभीषोमीययागेषु २१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पुरोडाशादीनि चोद्यंते तैरेषां न विकल्पः प्राकृतिकबाधप्रसंगात् न समुच्चयो निरपेक्षविधानादित्युक्ता पुनर्वैकल्पिकांतर
मुक्तं परिधानीयकर्मणि पात्राणां दर्शनं प्रदेयत्वेनावकल्प्यत इति । तत्र यदिष्टं प्राकृतिकबाधे न विकल्पदूषणमुक्तं तन्न शोभते ।
तुल्यबलविकल्पसाहीदृशं दूषणमुचितं न त्वेतस्मिन्प्रायेण ह्ययुक्तोऽयं विकल्पो विषमशिष्टत्वात् । तेनार्थैकत्वे सुपुरो
डाशादीनि चोद्यंते तानि स्वबलवत्त्वात्तिवत्सूत्रेणेतरं न प्राकृतिकबाधान्तिप्रापमिति । द्वितीयमपि वर्णकमयुक्तमिति आक्षिपति द्वि
तीयेऽपि वर्णके स्तोत्राद्युपपत्तिः । कथं पूर्वपक्षे प्राग्पूर्वार्धे चाहिरवद्यातीति वचनेन तावन्मात्रस्य होमार्थत्वं शिष्टं स्यादी
नां विघातेऽत्र न यडामानोधस्यातो ततः परिधानीयकर्मणि पात्रदर्शनमुपपद्यतो नेत्तत्वं कुतः । मरसीर्णो नियतत्वात्
कदाचिदपि दीर्घकालेऽपि म्रियमाणे सति स्फ्याद्याकारविनाशः स्याद् बहुलवदानो द्वारणात् । तत्र यज्ञपात्रतानोपपद्य
ते । स्फ्यादिजातीयं हि द्रव्यं यज्ञपात्रं जातमपगमेऽपि तदनुपपत्तिः । रथवादेवता हैसेलपरितापागान्निर्दिष्टिकादि बहुवदानमा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नं॰ ब॰ त्रेपि हि हूयमाने सकलस्य यजमानस्याभिलषमपेतं तस्मात्प्रतिप्रयोगमनुष्ठेयः। एकप्रयोगोपयुक्तानामनेनाग्नेन न
यजमानेन पुनस्तासां गार्ह्योपयोगात्। तदंतरे म्रियमाणेन तैर्दह्येत ननु तत्तैरेव दह्यतामत आह। निरिष्टिकस्यापादातुं पु॰ २
२२ तत्राक्तो निरिष्टिकत्वाद्वा। न हि निरिष्टिकेनग्निसाध्यं कार्यं कुर्वीत। ननु कथं बहूनां वा तद्बाधित्वा निरिष्टिकेष्वधिकृत
इत्याशंक्य परिहारमाह। अथ बह्वृचदाने ऽहीतो यागः हराम विकल्पः सकलपूर्वं बह्वृचदानोद्धरणाद्यङ्गसाधनमन्वारभ्य आह
बह्वृचदानामग्नीनां वेलायां नत्वाहव कुविकलत्वादिति यज्ञपात्राणां पद्यते पूर्वे जातस्यागमो निहितः। इदानीमेकबह्वृचदाना
पाद्दानेन तन्मानामग्नीनां तिरपगमात् तस्यापि यज्ञपात्रस्वरूपभेदाद्यज्ञपात्रैस्तद्दहनं तादृत्यनुपपन्नं स्यादित्युच्यते। दहनं तावद्यथेन राम
तु न किं विरुद्धं। न हि तत्र निरिष्टिकत्वदोषः प्रसज्येत कादाचित्कत्वात्। मः। तस्मादुद्धतानां ह्रस्वोमेवेति। लिंगदर्शनाच्चेति २२
सूत्रमाहिपतिस्वतुर्हे ग्रयत्पोदह्योरस्तु मयस्य पूर्वपक्षे सिद्धांते च तुल्यं लिंगं नैकस्यापि पक्षस्य साधकं नापि बाधकं। कुतः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नहिद्रव्यमात्रभेदादाहुतिभेदः एकदेवतत्वात्स्वैरिकैवाहुतिः करिष्यतेसा चाप्यवदातत्वात्केचिदाहुः।उत्पत्तिवाक्यशि
ष्टेन पुरोडाशादिद्रव्येणावाधितत्वात्तस्यशब्दादिवाजिनं कर्म्मान्तरं कल्प्यं तेनास्यवाक्यस्य कर्मान्तरमेवपूर्वपक्षे विधे
यमापत्तनीतिलिंगदर्शनमुपपन्नमितितदेतदेकदेशिमतं दूषयति इदं नोपपद्यते नहिद्रव्यसंयोगमात्रेणादेवतान्तरेण
कर्मान्तरं भवति। न चात्र देवतान्तरविधायकं वचनं मन्त्रवर्णो वास्ति। न चाप्यतः कर्त्वान्तरमिति सौमिकविधेः तत्प्राप्तादेवतालाभः। दा
र्शपौर्णमासिकेष्वंगेषु सौमिकविध्यातिदेशः सविहितकालवाधप्रसंगेन न्यायरत्नमालायां निरस्तत्वात्। दकेदेशिनं
वांगेषु लिंगाद्दिश्यन्तातिदेशमिच्छतां लिंगाभावस्तु तत्रासिद्धमयुक्तमभिधानं तु नह्यत्र सोमधर्मातिदेशे पशुविधप्रयाजादि
दर्शनं किंचिल्लिंगमस्तीति नातिदेशसंभवः। तस्मादव्यवस्थाव एवेने चतुरवत्तं जुहोतीति प्राकरणिकेषु सर्वहोमेषु च
तुरवत्तं विहितं। चतुरवत्तमिति विवक्षितसंख्यानिर्देशः। एकं चतुरवत्तं होमांगतया विहितमिति। तेनेमानिष्कसहानिदश

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं.वं. ङ्माणीतरेतरयुक्तानिहोमसाधनानिनञ्जीहियववन्निरपेक्षाणिसहविधानात्।तत्रैषांप्रतिज्ञयेन्द्रावदानेष्वहोमाणांबहू
नि चतुरवत्तानि भवंति।होमे चैकं चतुरवत्तं श्रुतं।सोयं परस्परव्याघात इत्यत आह।न चतुरवत्तं यद्येकस्मात्स्यादित्यत एक
२३ वचनानुरोधेन तत्तदितरेषां सह विधावगतं साधनत्वं हीयेत तत्र यदि तदनुरोधेन सर्वमात्स्याहीत्याहुर्योत्त एकत्वं हीयेतेत
पि वक्तव्यमर्थसिद्धत्वान्नोक्तमिति।तत्रोभयमसंपन्नयोर्भास्मत्तेर्यागा एकैकेन चतुरवत्तेन तत्स्मात्स्यादितिना एवंद्युभय
मुपपादितं भवति यद्धि सर्वेषां साधनत्वं यच्चैकचतुरवत्तसाधनत्वं।ननु ब्रह्मणि चतुरवत्तानि स्युस्त्वा संस्कारहोमेषु तेदेव
तेनैवशब्दानि किं विधिरित्यत आह।यथा सान्नाय्ये चतुरवत्तेष्विह स्युस्त्वा संस्कारहोमः।उ सति तत्र सान्नाय्ये चतुरवत्तविधानं तेनास्ती
तोपरेण संबंधः।कुत इत्याह कर्मभेदात् इह तत्कर्मणी सहानुष्ठीयेते।ततः किमिदं तत्तो भवति अनेन प्रदानेन २भ
सहानस्मिन्प्रदाने क्रियमाणे इतरदपि प्रदानमात्मीयं चतुरवत्तमितरस्मात् विवेकेनासंकरणात् कृत्स्नमिति इतरदपि २३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

२५ विवेकेनात्रचतुरवत्तविधातोनास्तीतितत्रेमुपन्यासार्थः॥ह्या मांहिचतुरवत्ता मांइ यो॰कर्मणोरेकैकस्यैकैकसाधनत्व
मविहितमेवेत्यभिप्रायः॥इहत्वेकत्वात्कर्मणःसर्वैश्चतुरवत्तैःसहसंहत्यानुष्ठानेक्रियमाणेसतिचतुरवत्तविधानमया
दमस्यतेसोमयागवन्नेत्याहइतिवक्तुत्वाच्चतुर्ह्रग्रहयोर्देशोनिनोपपद्यतेदर्शनिपशाविदानींकावाप्तिनहितत्रसान्नाय्य
वत्त्यागभेदःसमस्तितततत्रैकादशाभिरवत्तैःसहानुष्ठानेस्यैकत्वविधानमर्यादमासःप्रसज्येतनप्रसज्यतेचतुर
वत्तैकत्वस्यसिद्धांतप्रकृतावार्थिकत्वेनाशास्त्रीयत्वात्दैकस्यहियागस्यैकमेवपुरोडाशादिप्रकृतौहविःतन्मध्ये पूर्वो
इतिष्यन्नस्यचतुरवत्तस्यैकत्वंसिद्धमेवनविधेयंयत्रप्रकृतावार्थिकंनतत्रोदकःप्रदिशतिहविरेकत्वनिबंधनंहिप्र
कृतौचतुरवत्तैकत्वंनवाचनिकंपशौतुहविर्भेदाच्चतुरवत्तभेदेसतिसर्वैरवत्तैःसह[illegible]इतिनानुपपन्नंपूर्वपक्षेतुस्या
दीनांदशानामेकयागसाधनत्वात्तन्निष्पन्नानांचतुरवत्तानामप्राप्तमेकत्वंनानुवदितुंशक्यंतदितिअवश्यंचतुरवत्तै

ः१२॥ हरः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तं.रु. जुहोतीत्यनेनैव विधातव्यमिति तत्संपत्तये मासः प्रसज्यतइति स्थितं लिंगदर्शनं मिति। एतच्च चतुरवत्तं होमसाधनत्वेन
२४ विधीयतइति भाष्यकारमतमंगीकृत्योक्तं। स्वमते तु चतुरवत्तो हिरण्यहोमः संस्कारो विधीयतइत्युहे शेषकत्वस्य विवक्षित
त्वात्संभवत्येव सह होमइति परिधानीयेकर्म्मणि लिंगदर्शनं व्याख्येयं पूर्वस्तत्पक्षस्तु प्रथममेव व्याख्यातं॥ ॥तत्रैक
त्वं। ।ननु वस्तुतोऽर्थगुणस्य तोऽप्यमूर्त्तोऽप्यरुणिमानत्तद्दृष्टेः किंतु एतस्याश्रुणा करणत्वावगमात्क्रियार्थ एव इ
यपरिच्छेदद्वारेणोपपत्तेमेवतादर्थ्यमिति त्र्यरुणाधिकरणे प्रतिपादितं तत्कथमर्थं स्यागुणस्य त्वादयज्ञांगमेकत्व
मित्युच्यते तत्राह त्र्यरुणगुणएकहायन्या द्विपदात्पदान्तरेणारुणापदेनोपात्तत्वात्संभवतीति क्रियार्थः। एकत्वस्य विभ
क्तिश्रुत्या प्रातिपदिकार्थोत्वात्न क्रियार्थता किंतु द्रव्यार्थता। अद्रव्यस्य क्रियायाः पदान्तरेणोपात्तत्वात्तथा वैक्त्ये राम
कत्वमंगं स्यात् तच्चाश्रुतेर्दुर्वलं। तस्मान्न क्रियार्थमिति। नात्र वास्तवमर्थपारतंत्र्यमक्रियार्थत्वे युक्तिः। येनारुणाधिक २४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रणगोचरत्वात् किं त्वेकपदोपादानलक्षणया श्रुतार्थसमापतिप्रातिपदिकार्थस्य गुणभूतमवगम्यमानं न वाक्येन यज्ञांगमवि
तुमर्हतीति। एवं स्वार्थानामंगं विवक्षितं तथापीति चोद्यमाषंगं तदनुपपन्नं वाक्यभेदप्रसंगात्। न हि सकृदुच्चरितो विधिशब्दः
क्रियां विदधाति एकस्यांशं च संस्कारमिताप्यहं त्वित्यसंगः। तथा पशुरपि यागसंबंधे प्रत्युपादानो हेत्वादि विरुद्धत्रिकद्वययो
गी स्यात् अतएवाहुः अंतर्णीतानि संबंधे सकृदुच्चारितानि प्रायः प्रस्थितोद्यति अंतर्णीतैकत्वसप्तमीगोः क्रियासंबं
धात् एकत्वविशिष्टपशुविशिष्टो यागः सकृदुच्चरितेन विधिना वारत्रयं तु यद्विशिष्टकरोति तस्य ह्यर्थे विशिष्टयागवद्वि रेवती
धीयत इति। तथा च क्रियां गमाहरणीयं स्यादिति आहवनीयस्य यागांगस्यार्थेर्थेयं ह्युपकारकं भवतीति तत्प्रयाजादयोपि यद्यपि
